Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 5 | ISSN : 2582-0095

# आवन्तिक-मारुतिचरितयोः खण्डकाव्ययोः सामान्यपरिचयः

**अमितोषमिश्रः**

**शोधच्छात्रः, साहित्यविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी, उत्तरप्रदेशः**

**Article Info**
Volume 4 Issue 5
Page Number : 208-210
**Publication Issue :**
September-October-2021
**Article History**
Accepted : 01 Sep 2021
Published : 15 Sep 2021

**शोधसारांशः-** आवन्तिकम् आचार्यरमाशङ्करमिश्र'मधुप'वर्यस्य खण्डकाव्यमस्ति। आवन्तिके भागद्वयमस्ति- वन्दितं नन्दितञ्च। वन्दितभागे पञ्चसप्ततिः पद्यानि सन्ति नन्दितभागे च एकपञ्चाशत् पद्यानि। वन्दितभागे मुक्तकपद्यानि सन्ति नन्दितभागे वेदप्रियब्राह्मणः शिवभक्तिः वर्णिता अस्ति, पुनः चन्द्रसेनराज्ञः कथावर्णिता अस्ति।

**मुख्यशब्दाः-** आवन्तिकम्, आचार्यरमाशङ्करमिश्र, खण्डकाव्यम्, शिवभक्तिः।

वन्दितभागे प्रथमं चतुर्षु पद्येषु मङ्गलाचरणं कृतमस्ति। अत्र मङ्गलाचरणे प्रथमं पद्यद्वये शिववन्दना कृता अस्ति, पुनः विष्णुवन्दना विद्यते। ततः चण्डिकावन्दना कृता अस्ति। पुनः कविना स्वानहंकारः प्रदर्शितः। कविः अत्र कथयति यत् अवन्तिनगर्यां भगवतः महाकालस्य प्रतापरुपिमहासागरः विद्यते, मम बुद्धि तत्र वायुप्रकम्पिता नौका इव अस्ति, अतः अहमवन्तिनगर्य्याः माहात्म्यमपारमस्ति अतः सः एतस्मिन् अमितमाहात्म्यवर्णने सर्वथा अक्षमोऽस्मि।

पुनः कविः कथयति यत् मम काव्यम् अनन्तदोषयुक्तमस्ति पुनरपि विद्वान्सः सदैव तुच्छजनसमुद्धरणे तत्पराः भवन्ति अतः मां समुद्धरिष्यन्ति। भारतवर्षे काशी-अयोध्या-हरिद्वार-मथुरा-द्वारका-अवन्ति-काञ्चीनगर्य्यः प्रसिद्धाः सन्ति। अवन्तिकायां कालिदासादिपालकः श्रीमहाकालः नृत्यपरायणां पार्वतीमनुरञ्जयन् सदैव वसति। कविः कथयति यत् अवन्तिकानगरी शिप्रानद्याः पवित्रजलैः पूता अस्ति सा भक्तजनानां पापसमूहं विनाशयति।
पुनरपि अवन्तिकायाः माहात्म्यवशात् मम मनः तस्य वर्णनाय उत्कण्ठितमस्ति अतः विदुषां मार्गमनुशरन् कवियशःकामनाप्रेरितः सन् मन्दधीरपि वर्णयामि।

**तथाप्यवन्ती -महिमोच्छलन्मना**
**मनाग् बुध-क्षुण्ण-पथं समुल्लिहन्।**
**कवीन्द्र-कीर्त्यै स्पृहयन् पदे पदे।**
**स्खलत्-पदोऽहं कवयामि मन्द-धीः।**[1]

अवन्तिकायाः अपरनाम् उज्जयिनी अस्ति अत्र महाकालः पार्वत्या सह सदा वसति। अवन्तिकायां दूषणदैत्यस्य विनाशः अभूत्। सा नगरी चन्द्रसेनादीनां राज्ञां विपत्तिहारिणी अस्ति।

1 आवन्तिकम् 6

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अवन्तिनगर्यां भगवान् शिवः वसति अतः कवीनां मनः स्वयमेव तस्याः वर्णने प्रवृत्तं भवति। मम काव्ये काचित् पदच्छटा अलङ्काराणां घटा रीतिगुम्फने काचित् निपुणता न विद्यते। काव्यमिदं न तु रसनिष्पतिस्थलमपि अस्ति। अत्र भक्तिरूपिमञ्जरी स्वसौरभं तनोति।[2]

मम काव्यम् ईर्ष्याकषायितचित्तानां कृते आह्लादकं न भविष्यति। कविः कामयते यत् काव्यमिदं सहृदयानां कृते आह्लादकं भवतु।

कविः कथयति यत् कस्य मनः भगवतः शिवस्य चरणकमलयोः वर्णने उज्जयिनीवर्णने प्रवृत्तो न भवति अतः मतिः अपि आवन्तिकवर्णने प्रेरिता भवति।

पञ्चदशसु पद्येषु उपक्रमः समाप्तः भवति।

अवन्तिनगरी मुनीनां सिद्धानां च भूमिरस्ति। इयं रमणीनां रमणभूमिरप्यस्ति। अत्र कवयः काव्यद्वारा स्वयशः विस्तारयन्ति। अत्र गुप्तवंशीयाः राज्ञः शासनं चक्रतुः। इयं नगरी भगवतः शिवस्य पूजायां प्रयुक्तभस्मभिः सितवर्णा दृश्यते। अत्र महाकालमन्दिरे भगवान् शिवः राजते, तस्याङ्के विद्यमानायाः पार्वत्याः प्रतिदिनमभिषेकः भवति। अत्र सर्पराजकृतायां शय्यायां कार्तिकेय-गणपति-गौरीपरिवृतः शिवः राजते। तस्य प्रत्यङ्गं भुजङ्गाः भूषणरूपेण राजन्ते। शिरसि च चन्द्रः राजते। मन्दहाससराजितः शिवः अत्र पूज्यते। पुनः कविः कामयते यत् तस्य हृदये महाकालभक्तिः जायताम्-["कदा स्वहृदयमवेक्षै शिवमयम्"-आवन्तिकम् 2]

अवन्तिनगर्यां भगवान् महाकालः सपरिवारं वसति। कविः कामयते यत् सः स्वहृदये निरतं विद्यमानं मङ्गलस्वरूपं भगवन्तं महाकालं पश्येत्-["स्थितं श्रेयो वीक्षै निजहृदि महाकालमनिशम्"-आवन्तिकम् 22"]

पुनः अग्रे वर्णिताः विषयाः सन्ति-उज्जयिनीमहाकुम्भः, उज्जयिनी, महाकालमन्दिरम्, महाकालः, महाकालनगरी, उज्जयिनी-वैभवम्, कालिदासः, उज्जयिनी-परमोत्कर्षः,शिवजटायां गङ्गा, उज्जयिनी-सौभाग्यम्, भर्तृहरिः, भक्त-सौभाग्यम्, भोजराजः, गुप्त-वंशजा नृपाः, कालिदासः, कवि-सौभाग्यम्, महाकालः, क्षिप्रा नदी, त्रिगुणात्मकः शिवः, पुराणपुरुषोत्तमः शिवः, उज्जयिनी, प्रपन्न-क्रन्दनम्, गौरी, अवन्तिका, समुद्रगुप्त-भोजादि-दाक्षिण्यम्, भर्तृहरिः, साम्य-वैषम्य-लीला, शरण्या उज्जयिनी इत्यादयः।

नन्दितभागे प्राचीनकाले शिवभक्तः वेदप्रियोऽभिधानः ब्राह्मणः उज्जयिन्यां सपत्नीकं निवसति स्म। कश्चित्कालानन्तरं तयोः चत्वारः पुत्राः जाताः- तेषां नामानि आसन्- देवप्रियः, प्रियमेधा, सुकृतः सुव्रतश्च। चत्वारः पुत्राः वेदपारङ्गताः शिवभक्त्यामनुरक्ताः आसन्। पुनः दूषणाख्यः दानवः रत्नमालपर्वते घोरतपः प्रतेपे तस्य तपसः सन्तुष्टः ब्रह्मा तस्मैः भूरिबलं दुर्धर्षामुच्चां च लक्ष्मीं दत्तवान्। सः राक्षसः यद्यपि सर्वविभवैः युक्तोऽभवत् पुनरपि अतृप्त इव सर्वान् अपीडयत्। तेन सर्वे राजानः विजिताः, मनुजाः निर्जिताः, विद्वद्गणः वशीकृतः, सर्पगणः भयसात्कृतः, स्वर्गे च इन्द्रादिदेवा पदच्युतः कृतः। सः दानवः त्रैलोक्यं तृणमिव गणयन् उज्जयिनीं प्रति प्रयाणं कृतवान्। भ्रमणं कुर्वन् तेन शिप्रानद्याः तटे व्रतपरायणाः चत्वारः ब्राह्मणबालकाः दृष्टाः। तान् समाधिविरतान् कर्तुं सः न शशाक। क्रोधपूर्वकं तेन चत्वारः राक्षसाः प्रेषिताः तान् ब्राह्मणान् च स्वाधीनं स्वीकर्तुमादिदेश। समाधिरताः विप्राः दानवदूषणस्य कठोरवचनं श्रुत्वा भगवतः शिवस्य चरणयोः ईषदपि विरताः न

2 पदच्छटाऽलङ्कृति-सद्घटा न वा,\\
न वा नवा रीति-पटी-पटीयसी।\\
न सद्-रस-स्यन्द-मही महीयसी\\
महीयते किन्विह भक्ति -मञ्जरी।।-आवन्तिकम् 12।

अभवन्। तदा क्रोधाविष्टः दानवराजः दूषणः दूतेभ्यः सपरिवारं तान् विनष्टुमादिदेश। दानवराज्ञः दूषणस्य दूताः यदा तान् विप्रान् प्राप्तवान् तदा पार्थिवलिङ्गात् भगवान् शङ्करः आविर्बभूव। भगवान् शङ्करः पावकात्मकेन स्वतृतीयनेत्रेण तान् दूतान् भस्मसात् कृतवान्। चन्द्रात्मकनेत्रेण भक्तजनान् चुम्बितवान्, सूर्यात्मकनेत्रेण देवजनान् दृष्टवान्। इन्द्र–विष्णु–सूर्य–वरुण–ब्रह्मादयः सर्वे देवाः वेदमन्त्रैः भगवन्तं शिवं स्तुतवन्तः अनन्तरं भक्तजनाः शिवं नमश्चक्रतुः। भक्ताः शिवं प्रार्थयामासतुः हे भगवन्! भवान् सर्वदा उज्जयिन्यां निवासं करोतु! शिवः ओमित्युक्त्वा तेषां प्रार्थनां स्वीचकार। पुनः शिवः अन्तर्हितोऽभवत् ज्योतिर्लिङ्गश्च उल्लसितः बभूव। तदनन्तरं भगवान् विश्वकर्मा रमणीयमन्दिरं पूर्णं कृतवान्।

नन्दितभागे अवन्तिकानरेशस्य चन्द्रसेनस्य आमात्यः मणिभद्रः शिवार्चनेन शिवगणस्य आधिपत्यं प्राप्तवान्। शिवकृपातः तेन 'चिन्तामणिः'प्राप्ता। भूपतिगणः तं चिन्तामणिं याचितवन्तः परञ्च तेन तेभ्यः राजभ्यः मणिः न दत्ता अपितु न्यायप्रियाय राज्ञे चन्द्रसेनाय मणिः दत्ता। चिन्तामणिं प्राप्त्यर्थं समस्तनरेन्द्राः लालायिताः आसन्। ते वारम्–वारं तां मणिं चन्द्रसेनं याचितवन्तः परञ्च चन्द्रसेनः तेभ्यः मणिं न दत्तवान्। सर्वे राजानः मणिकारणात् चन्द्रसेनोपरि क्रुद्धाः जाताः, ते अवन्तिकापुरीं चतुर्दिग्भ्यः आवृत्यं चन्द्रसेनं बाधितवन्तः। भयात् राजा चन्द्रसेनः समस्तराज्ञां समक्षम् आत्मानमत्यन्तदुर्बलमवगणितवान्। निराशो भूत्वा राजा चन्द्रसेनः भगवतः महाकालस्य शरणं गतवान्। राजा चन्द्रसेनः शिवस्य प्रसीदये सहस्रकमलपुष्पाणां मालां तस्योपरि अर्पितवान्। खसादिसुगन्धितद्रव्यैः राजा चन्द्रसेनः भगवन्तं महाकालं प्रसीदयितुं यत्नं कृतवान्। तस्मिन्नन्तरे तत्र पञ्चवर्षीयेण बालकेन सह काचित् गोपाङ्गना आगता राज्ञः चन्द्रसेनस्य पूजापद्धतिं च ददर्श। सः गोपीपुत्रोऽपि राज्ञः पूजां विलोक्य अतिप्रेरितो भूत्वा एकान्ते पूजायां संलग्नो जातः। तेन बालकेन निराहारपूर्वकं शिवं पूजयामास। मनसा वाचा कर्मणा सः बालकः पार्थिवं शिवलिङ्गं पूजयामास। सः गोपपुत्रः भस्मं लेपयित्वा, रुद्राक्षं धारयित्वा निद्रां च विजित्य अधिकं तेजस्वी जातः। शिवपूजायां तन्मयत्वात् सः बालकः मित्रैः सह परिहासं बालोचितचेष्टां भोजनादिषु रसास्वादं हिंसा च सर्वान् परित्यक्तवान्। अनेन प्रकारेण शिवानुरागे सः गोपबालकः वन्दनीयो जातः। बालकस्य एतादृशीमवस्थां विलोक्य तस्य माता क्रुद्धा जाता सा बालकं शिवपूजातः अपवारितवती पूजासामग्रीं च जलराशौ क्षिप्तवती। सः बालकः भ्रष्टबुद्धिं स्वमातरं विलोक्य शिवस्य ध्याने मग्नः बभूव। सः बालकः शिवपार्वत्योः पुत्रद्वयसहितं दर्शनं लब्धवान्। दर्शनात् सः बालकः हृदयगतेभ्यः दुःखेभ्यः शून्यः भेदभावरहितो भूत्वा अतिप्रसन्नो भूत्वा शिवमाराधयामास। तदा सः बालकः देवाङ्गनासदृशीं स्वमातरं दृष्टवान्। स्वामात्रा सह संयुक्तः भूत्वा सः बालकः पुनः महाकालमर्चयामास। हार्दिकसन्तापेभ्यः मुक्तो भूत्वा राजा चन्द्रसेनोऽपि शिवमन्दिरं गतवान् शिवं प्रणम्य तं बालकं पर्याप्तवैभवेन सम्मानितवान्। चिन्तामणिप्राप्तेः चिन्तायां निमग्नाः राजानः अपि शिवभक्तबालकस्य चर्चां श्रुत्वा राज्ञा चन्द्रसेनेन सह मैत्रीं कृतवान्। केचित् राजानः तस्मै बालकाय उपहारान् दन्तवन्तः अनेन प्रकारेण सर्वे राजानः तं बालकं गोपगणनायकं कृतवन्तः। तदा शिवभक्त्या ओतप्रोतः हनुमान् प्रकटो भूत्वा तस्मै बालकाय कथितवान् हे मित्र! त्वं श्रीकरनाम्ना प्रसिद्धो भव। अस्य श्रीकरस्य कुले नन्दगोपः भविष्यति तस्य पत्नी भविष्यति 'यशोदा'। तयोः एव बालकः श्रीकृष्णः भविष्यति। अनेन प्रकारेण तत्रोपस्थितानां समक्षं शिवस्य पूजापद्धतिं वर्णयित्वा हनुमान् अन्तर्ध्यानोऽभूत्। पुनः कविः कथयति यत् इयं कथा पुराणेभ्यः गृहीता अस्ति। केचित् भक्ताः महाकालं स्तुवन्ति, केचित् भक्तिपूर्वकं प्रणमन्ति, केचित् ध्यानं कुर्वन्ति, केचित् तद्विषयकं काव्यं कुर्वन्ति। केचित् शिप्रायां पार्श्वे शेरते, केचित् अवन्तिं महाकालेश्वरं वा गच्छन्ति। सांसारिकाज्ञानेन मात्सर्यभावेन च रहिताः ये सज्जनाः इदमावन्तिककाव्यं पठन्ति ते आत्मानं सर्वविधमुन्नतिं कुर्वन्ति। पुनः कविवंश–वर्णना, आवन्तिककाव्य–मङ्गल–समीहा, आवन्तिककर्ता आदिवस्तुजातमुपवर्णितमस्ति। अनेन प्रकारेण काव्यमिदं पूर्णं भवति।

**सन्दर्भः-**

1. आवन्तिकम्,वर्षम् 1976, प्रकाशनम्–शैलजाप्रकाशनं अज्झारा लालगंज, प्रतापगढ़जनपदम्।